# Kaveryashtakam Sahyakanyakashtakam

# કાવેર્યાષ્ટકમ્ અથવા સહ્યકન્યકાષ્ટકમ્

## Document Information

Text title : kAveryaShTakam 3 sahyakanyakAShTakam

File name : kAveryaShTakam3.itx

Category : aShTaka, devii, nadI, devI

Location : doc_devii

Author : Krishnapremi Anna

Transliterated by : Musiri Janakiraman

Proofread by : Musiri Janakiraman

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2024

*sanskritdocuments.org*

# કાવેર્યાષ્ટકમ્ અથવા સહ્યકન્યકાષ્ટકમ્

સરોજ-સમ્ભવાચ્યુત-ત્રિનેત્ર-ભાવનામયીં
કવેર-રાજ-કન્યકાં ચ કામિતાર્થ-દાયિનીમ્ ।
અગસ્ત્ય-કુણ્ડિકાન્તર-પ્રવિષ્ટ-વારિરૂપિણીં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૧॥

પવિત્ર-ધાત્રિ-વૃક્ષરૂપ-વિષ્ણુપાદ-સઙ્ગમાં
પતત્રિરૂપ-ધારિ-વિઘ્નરાજ-ચુઞ્ચુ-ચુમ્બિતામ્ ।
ભવાબ્ધિ-તારકાત્રિસૂનુ-પાદુકા-પવિત્રિતાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૨॥

અનેક-કોટિ-પુણ્ય-તીર્થ-સઙ્ગમેન પૂરિતાં
અનોકહ-પ્રકીર્ણ-પુષ્પ-પલ્લવૈઃ પરિષ્કૃતામ્ ।
નિનાદ-પૂર્ણ-ચારુ-વીચિ-કીર્ણ-રત્ન-મૌક્તિકાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૩॥

તટદ્વયેપિ શમ્ભુ-વિષ્ણુ-મન્દિરૈ-ર્વિરાજિતાં
તટિલ્લતા-સમાન-દેવસુન્દરીભિ-રાશ્રિતામ્ ।
વટાદિ-વૃક્ષ-મૂલવાસિ-મૌનિ-વૃન્દ-ભાવિતાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૪॥

તરઙ્ગ-ચારુ-મેખલાં વિલોલ-મીન-લોચનાં
પ્રવાળ-મૌક્તિકોજ્જ્વલાં પ્રફુલ્લ-પુષ્પ-માલિકામ્ ।
કુચાયિતાબ્જ-કુડ્મલાં ચ કુઙ્કુમાદિ-પાટલાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૫॥

ભુજઙ્ગ-શાયિ-રઙ્ગનાથ-પાદ-સેવનાશયા
ભુજ-દ્વયં પ્રસાર્ય નિઃસૃતામિવ સ્થિતાં મુદા ।
ગજેન્દ્ર-કેળિ-વર્ધિનીં દ્વિજેન્દ્ર-હર્ષ-દાયિનીં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૬॥

કિરીટિ-રામ-શન્તનુ-પ્રભૃત્યનેક-પાર્થિવૈઃ
પ્રપૂજિતાં ચ ધર્મવર્મ-રાજ-દાલ્ભ્ય-કીર્તિતામ્ ।
ધરાતલૈક-ભૂષણાં સુરાદિ-સર્વ-જીવનાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૭॥

પ્રનષ્ટ-પઞ્ચ-પાતકાં પ્રકૃષ્ટ-પુણ્ય-દાયિકાં
સહર્ષ-દિવ્ય-કેળિકાં સમુદ્ર-રાજ-નાયિકામ્ ।
સહસ્ર-પત્ર-માલિકાં સરોજ-પત્ર-દોળિકાં
ભજામિ સહ્યકન્યકાં ભજામિ સહ્યકન્યકામ્ ॥ ૮॥

સહ્યકન્યાષ્ટકમિદં પુણ્યં પ્રેમિકેન પ્રકીર્તિતમ્ ।
શ્રદ્ધયા કીર્તયન્નિત્યં સર્વમઙ્ગળમાપ્નુયાત્ ॥ ૯॥

ઇતિ કાવેર્યાષ્ટકં અથવા સહ્યકન્યકાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by Musiri Janakiraman

Proofread by Musiri Janakiraman, Rajani Arjun Shankar

*Kaveryashtakam Sahyakanyakashtakam*

pdf was typeset on July 13, 2024

Please send corrections to *sanskrit@cheerful.com*